# आदर्श प्रश्नपत्रम् (2025-26)

**कक्षा-एकादशी** **कोड न. - 526**

रोलनं०

# संस्कृतम्

समयः -होरात्रयम्] [पूर्णाङ्काः -80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 8 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपयाप्रश्नकाउत्तरलिखनाशुरूकरनेसेपहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर नकाटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः:–**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन्प्रश्नपत्रेपञ्चखण्डाःसन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 17 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 31 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

# खण्डः‘क’

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

अस्माकं देशे प्रतिवर्ष षड् ऋतवः भवन्ति । तथाहि चैत्र-वैशाखौ वसन्तः, ज्येष्ठ-आषाढौ ग्रीष्मः, श्रावण-भाद्रपदौ वर्षा, आश्विन-कार्तिकौ शरद्, आग्रहायणपौषौ हेमन्तः, माघ-फाल्गुनौ च शिशिरः-इत्यनेन क्रमेण इमे षड् ऋतवः आयान्ति यान्ति च। तत्र आदौ परिगणितः वसन्तर्तुः सहृदयैः जनैः ऋतुमर्मज्ञैः सचेतसैः कविभिः च 'ऋतुराजः' इति नाम्ना संकीर्त्यते। वसन्ते कालस्य रामणीयकं तु सर्वैः अनुभूतम् एव । यतो हि न तावत् करालशिशिरस्य शैत्यं न चापि प्रचण्डस्य ग्रीष्मस्य उष्णता । समशीतोष्णः अयं कालः अतीव सुखदः प्रियः च भवति। वसन्ते सर्वत्र एव अभिनवं साम्राज्यं भवति। सर्वे वृक्षाः प्रफुल्लिताः भवन्ति, लताः पुष्पिताश्च भवन्ति, पादपाः नवानि पत्राणि धारयन्ति, आम्रवनं नवैः किसलयैः शोभते। सर्वत्र नयनाह्लादिनी मनोरमा च शोभा वर्तते। फलभारेण वृक्षाः विनम्राः सन्ति। कोकिलाः मधुरस्वरेण कूजन्ति, भ्रमराः गुञ्जन्ति, मयूराः नृत्यन्ति, वनेषु उपवनेषु उद्यानेषु च विविधानि पुष्पाणि विकसन्ति । अतएव वसन्तर्तुः कस्मै न रोचते ।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) अस्माकं देशे प्रतिवर्ष कति ऋतवः भवन्ति ?
(ख) 'ऋतुराजः' इति नाम्ना कैः संकीर्त्यते ?
(ग) समशीतोष्णः अयं कः अतीव सुखदः प्रियः च भवति ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) के प्रफुल्लिताः भवन्ति ?
(ख) पादपाः नवानि कानि धारयन्ति ?
(ग) फलभारेण वृक्षाः कीदृशाः सन्ति ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) "आदौ " इत्यस्य शब्दस्य विलोमपदं किम् ?
(क) अवनतिः (ख) अन्ते
(ग) प्रवीणः (घ) वृक्षाः

(ii) "कविभिः " इत्यस्मिन् शब्दे का विभक्तिः ?
(क) चतुर्थी (ख) पञ्चमी
(ग) तृतीया (घ) सप्तमी

(iii) " वृक्षाः प्रफुल्लिताः " अत्र विशेषणपदं किम् ?
(क) वृक्षाः (ख) प्रफुल्लिताः
(ग) वृक्षाः प्रफुल्लिताः (घ) सर्वाः

(iv) " वसन्ते " इत्यस्मिन् शब्दे का विभक्तिः ?
(क) चतुर्थी (ख) पञ्चमी
(ग) सप्तमी (घ) षष्ठी

# खण्डः ‘ख’

# रचनात्मक-कार्यम्

2. निज अध्ययनस्य प्रगतेः विषये अग्रजं प्रति लिखितं निम्नलिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयत - 5

परीक्षाभवनम्

दिनाङ्कः 23-03-2023

पूजनीय (i) .................. !

सादर नमस्कार।

विनम्रनिवेदनम् अस्ति यत् सम्प्रति मम अध्ययनं नियमितम् अस्ति। अहं प्रातः (ii) ................ उत्थाय सप्तवादनं यावद् अध्ययनं करोमि। गतमासिक-परीक्षायां गणितविषये शतप्रतिशतम् अङ्कान् गृहीत्वा अहं निज कक्षायां (iii) ............ प्राप्तवान्। संस्कृते मया 98%(iv) .................. प्राप्ताः। वार्षिकपरीक्षायां भवत्कृपया इतोऽपि (v) ................ सफलतां प्राप्स्यामि।

पितृभ्यां मम प्रणामाः।

भवदीयः अनुजः

रामः

**मञ्जूषा**

| |
|---|
| अधिकां, अङ्काः, पञ्चवादने, प्रथमस्थानं, अग्रज |

## (छन्द-अलङ्कार-परिचयः)

3.अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) मन्दाक्रान्ता-छन्दसि कति वर्णाः सन्ति ?
(ख) शिखरिणीछन्दसः उदाहरणं किम् ?
(ग) इन्द्रवज्राछन्दसः उदाहरणं किम् ?
(घ) छन्दसि कति गणाः सन्ति ?

4.अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) विशेषोक्ति-अलङ्कारस्य उदाहरणं किम् ?
(ख) अर्थान्तरन्यास-अलङ्कारस्य लक्षणं किम् ?
(ग) उपमायाः अलङ्कारस्य लक्षणं किम् ?
(घ) ........... वैषम्येऽपि स्वरस्य यत् । (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः'ग'

# पठित-अवबोधनम्

5.अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

सङ्गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।

देवा भागं यथा पूर्वे सञ्जानाना उपासते ।।

**अथवा**

हंसो यथा राजतपञ्जरस्थ ।

सिंहो यथा मन्दरकन्दरस्थः ।

वीरो यथा गार्वितकुञ्जरस्थ –

श्चन्द्रोऽपि बभ्राज तथाम्बरस्थः ।।

6.अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

अथ कदाचित् सत्त्वानां भाग्यवैकल्यात् प्रमादाच्च सम्यग् देवो न ववर्ष। वृष्टेः अभावे तत् सरः कदम्बकुसुमगौरेण नवसलिलेन यथापूर्वं न परिपूर्णं जातम्। क्रमेण च उपगते निदाघकाले दिनकरकिरणैः अभितप्तया धरण्या, ज्वालानुगतेनेव मारुतेन पिपासावशादिव प्रत्यहम् आपीयमानं तत् सरः लघुपल्वलमिवाभवत्।

**अथवा**

एतेन प्रातिवेशिकगृहपतिदारकस्य सुवर्णशकटिकया क्रीडितम्। तेन च सा नीता। ततः पुनस्तां मार्गयतो मयेयं मृत्तिकाशकटिका कृत्वा दत्ता। ततो भणति रदनिके! किं मम एतया मृत्तिकाशकटिकया? तामेव सुवर्णशकटिकां देहि इति।

7.अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योःभावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) मारुतः कुसुमैः पश्य सौमित्रे ! क्रीडन्निव समन्ततः ।

(ख) अस्मद्व्यसन सङ्कृष्टा समायन्ति न द्विषः ।

(ग) मानो हि महतां धनम्।

(घ) न केवलं रूपं शीलमपि तर्कयामि ।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

उत्तिष्ठ हे कापुरुष मा शेष्वैवं पराजितः।

अमित्रान्नन्दयन्सर्वा निर्मानो बन्धुशोकदः।।

**अन्वयः:-**

हे 1) ................. ! सर्वान् 2) ....................... नन्दयन् 3) .......................... बन्धुशोकदः एवं 4) .....................

मा शेष्व 5) ........................... ।

**मञ्जूषा**

| पराजितः, निर्मानः, कापुरुष, अमित्रान्, उत्तिष्ठ |
| --- |

8.अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत-
(केवलं प्रश्नत्रयम्) 3×1=3

यः आत्मनः प्रियसुखे हित्वा मृगयते श्रियम्।

अमात्यानामथो हर्षमादधात्यचिरेण सः।।

**प्रश्नाः -**

(क)आत्मनः किं हित्वा मृगयते ?
(ख) सः अचिरेण केषां हर्षम् आदधाति ?
(ग) कः किम् आदधाति ?
(घ) "आदधाति" अत्र कः लकारः ?

9.अधोलिखितं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत-
(केवलं प्रश्नत्रयम्) 3×1=3

उष्णं हि भुज्यमानं स्वदते, भुक्तं च अग्निम् औदार्यम् उदीरयति, क्षिप्रं जरां गच्छति, वातम् अनुलोमयति, श्लेष्माणं च परिह्रासयति, तस्मादुष्णमश्नीयात्।

**प्रश्नाः -**

(क) उष्णं भोजनं किम् उदीरयति ?
(ख) कीदृशं भोजनं वातम् अनुलोमयति ?
(ग) कस्मात् उष्णम् भोजनम् अश्नीयात् ?
(घ) अनुलोमयति अत्र कः उपसर्गः ?

10.कोष्ठकात् उपयुक्तशब्दं चित्वा रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत- (केवलं चत्वारः प्रश्नाः) 4×1=4

(क) ज्योतिषां ज्योतिः मनः कथ्यते। (केषां / कासां)

(ख) शक्रः देवानां राजा आसीत्। (कः / के)

(ग) संजयः सिन्धुराजेन निर्जितः आसीत्। (केन / केभ्यः)

(घ) रोहसेनः सुवर्णशकटिकया क्रीडितम् इच्छति। (काया / कया)

(ङ)आकाशे अकालाः अपि मेघाः प्रादुरभवन्। (के / कैः)

## (संस्कृत-साहित्य-परिचयः)

11.अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) वेदानाम् कति संख्या सन्ति ?

(ख) जातकमालायाः रचयिता कः ?

(ग) महाभारतस्य रचयिता कः ?

(घ) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति ?

(ङ) रामायणे कति काण्डानि सन्ति ?

12.अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत -(केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) श्रीमद्भगवद्गीतायां कति श्लोकाः सन्ति ?

(ख) "सुवर्णशकटिका" इति पाठः कस्मात् ग्रन्थाद् उद्धृतः ?

(ग) आदिकविना वाल्मीकिना कः ग्रन्थः रचितः ?

(घ) शूद्रकस्य रचनायाः नाम किम् ?

(ङ) चरकस्य रचनायाः नाम किम् ?

## खण्डः– 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. (क) स्वरसन्धेः अथवा यण्-सन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) तत्पुरुषसमासस्य अथवा बहुव्रीहिसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत।

1×2=2

(घ) अपादानकारकस्य अथवा अधिकरणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत।

1×2=2

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

1) "दत्त्वा" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) क्त्वा (ख) शतृ

(ग) ल्यप् (ग) तुमुन्

2) "कदापि" इत्यस्य पदस्य सन्धिविच्छेदोऽस्ति –

(क) क + अपि (ख) कदा + अपि

(ग) कदाः + अपि (घ) कद + अपि

3) "प्रति+अहम्" इत्यत्र कः सन्धिः ?

(क) यण्-सन्धिः (ख) अयादिसन्धिः

(ग) गुणसन्धिः (घ) दीर्घसन्धिः

4) "चन्द्रोऽपि" इत्यत्र कः सन्धिविच्छेदोऽस्ति ?

(क) चन्द्रो + अपि (ख) चन्द्रो + ऽपि

(ग) चन्द्रः + अपि (घ) चन्द्रः + ऽपि

5) "सुवर्णव्यवहारः" इत्यत्र कः समासः ?

(क) अव्ययीभावसमासः (ख) तत्पुरुषसमासः

(ग) कर्मधारयसमासः (घ) द्वन्द्वसमासः

6) "भारतमाता" इत्यत्र समासविग्रहोऽस्ति -

(क) भारतं च माता च (ख) भारतानां माता

(ग) भारतनां च माताः (घ) भारताः माताः

7) "जननी" इत्यस्य पदस्य पर्यायपदं किम् ?

(क) पुत्री (ख) पुत्रः

(ग) दारकः (घ) माता

8) " प्रत्यहम्" इत्यस्य पदस्य पर्यायपदं किम् ?

(क) प्रतिदिनम् (ख) प्रतिरात्रम्

(ग) प्रतिहोरा (घ) प्रतिहरम्

9) "अमङ्गल्याः" इत्यस्य पदस्य विलोमपदं किम् ?

(क) अकल्याणाः (ख) अनमङ्गल्याः

(ग) कल्याणाः (घ) बेमङ्गल्याः

10) "प्रविष्टा" इत्यस्य पदस्य विलोमपदं किम् ?

(क) कृत्वा (ख) नत्वा

(ग) निष्क्रान्ता (घ) हत्वा

11) "पठितम्" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) तुमुन् (ख) क्त

(ग) शतृ (घ)क्त्वा

12) "खादित्वा" इत्यस्मिन् पदे कः प्रत्ययः ?

(क) क्त्वा (ख) शतृ

(ग) ल्यप् (ग) तुमुन्

13) "विना" इत्यस्मिन् उपपदयोगे का विभक्तिः भवति ?

(क) चतुर्थी (ख) षष्ठी

(ग) सप्तमी (घ) तृतीया

14) "प्रति" इत्यस्मिन् उपपदयोगे का विभक्तिः भवति ?

(क) तृतीया (ख) षष्ठी

(ग) द्वितीया (घ) पंचमी

15) "सर्वान् तनयान् " अत्र विशेष्यपदं किम् ?

(क) नृपान् (ख) बालकान्

(ग) रजकान् (घ) तनयान्

16) "सर्वे बालकाः" अत्र विशेष्यपदं किम् ?

(क) सर्वे (ख) बालकाः

(ग) मूर्खः (घ) प्रकाशः

17) "सनातनानि कुलानि" अत्र विशेषणपदं किम् ?

(क) पत्रम् (ख) कुलानि

(ग) सनातनानि (घ) समतिक्रामत्सु